# राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आ.प्र.

**National Sanskrit University : Tirupati, A.P.**

*(A Central University Established By An Act of Parliament)*


# वाग्वर्धिनीपरिषद्

।।वाक्पतङ्गाय धीयते ।। युवा स्यात्साधु युवाध्यायकः।।


डा. भारतभूषणरथः
संयोजकः

डा. प्रदीपकुमारबाग्
संयोजकः

डा. उदयन हेगडे
सहसंयोजकः


To,

……………………………………………..

……………………………………………..

……………………………………………..

……………………………………………..

**विषयः - चतुर्थः अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहः- 2026 - आमन्त्रणम्।**

मान्याः !

पारम्परिकशास्त्रसमुत्कर्षकेन्द्रत्वेन प्रसिद्धेन तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयेन शास्त्राणां संरक्षणाय संवर्द्धनाय च अविच्छिन्नरूपेणाधुनिके जगति सततं प्रयासो विधीयते।

अखिलभारतस्तरे विश्वविद्यालयोऽयं संस्कृतशिक्षायाः प्रमुखसंस्थात्वेन बहुकालात् प्रसिद्धः सन् प्रमाणयति यत् शिक्षायाः लक्ष्यं न केवलं छात्राणां ज्ञानसंवर्द्धनम्, अपि तु तेषामन्तर्निहितप्रतिभाप्रकाशनेन सर्वाङ्गीणविकाससाधनमिति। तदर्थमेव राष्ट्रियसंस्कृतविश्वविद्यालयेऽस्मिन् छात्रप्रतिभाऽन्वेषणाय प्रतिवर्षं विविधाः शैक्षिक-सांस्कृतिक-क्रीडादिस्पर्धाः समायोज्यन्ते। तदङ्गत्वेन संस्कृतच्छात्रेषु उत्साहसंवर्द्धनाय विश्वविद्यालयोऽयं मानितविश्वविद्यालयसमये 2007 संवत्सरादारभ्य नियमितरूपेण दिनचतुष्टयात्मकम् अखिलभारतीयसंस्कृतच्छात्र-प्रातिभसमारोहं सफलतया समायोजयति। ऐषमोऽपि विद्यार्थिविकासयोजनान्तर्गतत्वेन विश्वविद्यालयीयवाग्वर्धिनीपरिषदा **चतुर्थः अखिलभारतीय-संस्कृतच्छात्रप्रातिभसमारोहः** अखिलभारतस्तरे **04.02.2026** दिनाङ्कतः **07.02.2026** दिनाङ्कपर्यन्तं समायोक्ष्यते।

तत्र भवन्तो भवन्तः समारोहेऽस्मिन् विविधस्पर्धासु भागं ग्रहीतुं भवत्संस्थातः छात्रान् कृपया प्रेषयन्त्विति सम्प्रार्थना।

## समारोहस्य सम्पूर्णविवरणी अधोलिखिता वर्तते

**समारोहस्यास्य सन्त्यधोलिखितान्युद्देश्यानि-**

१. संस्कृतच्छात्राणां शैक्षिकसांस्कृतिककौशलविकासाय समुचितावसरप्रदानम्।

२. विभिन्नसंस्कृतसंस्थानां संस्कृतच्छात्राणां मध्ये सौहार्दस्य द्रढीकरणम्।

३. संस्कृतच्छात्रेषु शैक्षिकसांस्कृतिकस्पर्धायामुत्साहसंवर्द्धनम्।

४.अखिलभारते विभिन्नस्थलेषु विद्यमानानां संस्कृतसंस्थानां छात्राणाञ्च आत्ममूल्याङ्कनाय स्वप्रतिभागवेषणाय चावकाशप्रदानम्।

५. संस्कृतच्छात्राणां वक्तृत्व-वादविवादादिकौशलानां संवर्द्धनाय प्रेरणाप्रदानञ्च। अनेन ते आत्मनः सन्तुलितव्यक्तित्वविकासेन भारतस्य दायित्वसंपन्ननागरिकाः भवेयुः।

## समारोहे आयोज्यमानाः स्पर्धाः

### शैक्षिकस्पर्धाः

**(1) शास्त्रभाषणस्पर्धाः**

अधोनिर्दिष्टेषु शास्त्रेषु भाषणस्पर्धाः

(अ) वेदभाष्ये

(आ)साहित्ये

(इ) व्याकरणे

(ई) न्यायवैशेषिकयोः

(उ) साङ्ख्ययोगयोः

(ऊ)पूर्वमीमांसायाम्

(ऋ) वेदान्ते

(ॠ)धर्मशास्त्रे

(ए) ज्यौतिषे

(ऐ) पुराणेतिहासयोश्च

(ओ)आगमे

(औ)भारतीयज्ञानपरम्परा

**(2) अन्त्याक्षरी ।**

**(3) समस्यापूर्तिः**

**(4) रसप्रश्नाः**

## पुरस्काराः

- **वैयक्तिकस्पर्धानां पुरस्काराः -**

| | | |
|---|---|---|
| प्रथमःपुरस्कारः | - | स्वर्णपदकं, प्रमाणपत्रं, धनराशिश्च । |
| द्वितीयः पुरस्कारः | - | रजतपदकं, प्रमाणपत्रं, धनराशिश्च । |
| तृतीयः पुरस्कारः | - | कांस्यपदकं, प्रमाणपत्रं, धनराशिश्च । |
| सान्त्वनापुरस्कारः | - | प्रमाणपत्रं, धनराशिश्च । |

- **विजयवैजयन्तीपुरस्कारः**

सर्वोच्चाङ्कान् प्राप्तवते संस्कृतानुष्ठानाय विजयवैजयन्ती प्रदीयते। तदर्थमङ्कनिर्धारणमेवं भवति –

| **पुरस्कारः** | **शैक्षिकस्पर्धानाम्** |
|---|---|
| प्रथमः पुरस्कारः | ५ अङ्काः |
| द्वितीयः पुरस्कारः | ३ अङ्काः |
| तृतीयः पुरस्कारः | २ अङ्काः |
| सान्त्वनापुरस्काराः | १ अङ्कः |

इत्थं प्राप्तान् पुरस्कारानाधृत्य अङ्काः गण्यन्ते।

# परिशिष्टम्

## साधारणनियमाः

1. प्रतिसंस्कृतानुष्ठानमधिकाधिकम् **दश छात्रैः (10)** सहितः समूहः प्रेषणीयः। प्रत्येकं भागग्रहणसंस्था केवलमेकं दलं प्रेषयितुं शक्नोति यस्मिन् **१० दश छात्राः (शैक्षिकप्रतियोगितानां कृते) ।** तथा च सम्पूर्णस्य छात्रदलस्य कृते मार्गदर्शकरूपेण केवलमेकः एव अध्यापकः आगन्तुं शक्नोति। बालिकानां सहयोगाय एका महिला मार्गदर्शिका अपि आगन्तुमर्हति।

## 2. स्पर्धायां भागग्रहणाय छात्राणां योग्यता :

(अ) तत्तदनुष्ठानानां नियमिताः (Regular) छात्रा एव भागं ग्रहीतुमर्हन्ति। शास्त्री, B.A(Sans.) एवम् आचार्य ; M.A.(Sans) तत्समकक्षाः छात्रा एव भागं ग्रहीतुमर्हन्ति। **शिक्षाशास्त्रि-शिक्षाचार्य-विद्यावारिधि: (B.Ed., M.Ed., Ph.D) छात्रा: अस्यां स्पर्धायां भागं ग्रहीतुं नार्हन्ति। दूरशिक्षाकेन्द्रे पञ्जीकृताश्छात्राः (CDOE) अप्यत्र भागं ग्रहीतुं नार्हन्ति।**

(आ) प्रतिस्पर्धिषु एकः छात्रः एकस्यैव विश्वविद्यालयस्य प्रतिनिधिर्भवेत्।

(इ) छायाचित्र-कक्ष्यासूचनासहितानि परिचयपत्राणि तत्तदनुष्ठानाधिकारिणां हस्ताक्षराङ्कित्तानि छात्रैरवश्यमानेयानि।

## 3. अनुशासनम् (Discipline):

सर्वैः प्रतिस्पर्धिभिः छात्रैः अनुशासितैः (Disciplined) भाव्यम्। यः कोऽपि अनुशासनहीनः किमपि असामाजिकं कार्यं कुर्वन् लक्षितः चेत् सः स्पर्धायां भागग्रहणाय अनर्हः इति घुष्यते।

1. एकस्यां स्पर्धायां चत्वारः भागग्रहीतारः लभ्यन्ते चेदेव स्पर्धा आयोज्यते।
2. निर्णायकानां निर्णयः एव सर्वमान्यः अन्तिमश्च।

## 4. यात्राव्यवविवरणम् –

प्रतिभागिभ्यः छात्रेभ्यः, मार्गनिर्देशकायाध्यापकाय च द्वितीयश्रेणी(Sleeper) रेलयानस्य गमनागमनयात्राव्ययः विश्वविद्यालयेन दीयते। तत्तद्विद्यासंस्थाधिकारिभिः रेलयानमूल्योगव्यवस्था (Railway fare Concession) स्वीकरणीया इति सूच्यन्ते। रा.सं. विश्वविद्यालयेन तत्कालचीटिकायाः देयमूल्यं नैव प्रदास्यते।

अ) प्रतिभागिनां छात्राणामावासव्यवस्था रां.सं.विश्वविद्यालयेन कल्प्यते। आच्छादनशयनवस्त्रादिकं (Bedsheet etc.) स्वयमेव आनयेयुः। तदवसरे तिरुपतिनगरस्य वायुः सुखदस्तथा स्थानीयं तापमानं 35-45 डिग्रीपरिमितं भवितुमर्हति।

आ) पञ्जीकरणार्थं सम्बद्धसंस्थाः पञ्जीकरणपत्राणि यथावत्प्रपूर्य निर्दिष्टदिनाङ्कं यावत् प्रेषयेयुः।

# विभिन्नस्पर्धानां निगमाः

## शैक्षिकस्पर्धाः

सम्बद्धसंस्थाभ्यः आगतेषु छात्रेषु निर्दिष्टाः दश छात्राः (10) शैक्षिकस्पर्धासु भागं गृह्णीयुः। एकः छात्रः तिसृषु स्पर्धासु भागं ग्रहीतुमर्हति। यथा- एकः छात्रः भाषणे, अन्त्याक्षर्यां, रसप्रश्ने च अथवा भाषणे समस्यापूर्तौ रसप्रश्ने च अथवा रसप्रश्ने अन्त्याक्षार्यां समस्यापूर्तौ च इति।

**(अ) शास्त्रभाषणस्पर्धाः-**

(क) शास्त्रभाषणस्पर्धायां भागग्राही छात्रः अधिकाधिकं शास्त्रत्रये भागं ग्रहीतुमर्हति।

(ख) परमेकस्य अनुष्ठानस्य द्वौ छात्रौ एकस्मिन्नेव शास्त्रे भागं ग्रहीतुं नार्हतः।

(ग) शास्त्रभाषणस्पर्धाविषयः २४ होराभ्यः पूर्वमेव उद्घोष्यते।

(घ) प्रतिच्छात्रं षण्णिमेषाः स्पर्धायां दीयन्ते, तत्र पञ्च निमेषाः भाषणाय, एकः निमेषः प्रश्नसमाधानाय च।

**(आ) अन्त्याक्षरी**

अस्यां स्पर्धायां सर्वे स्पर्धालवः भागं ग्रहीतुमर्हन्ति ।

**(इ) समस्यापूर्तिः**

अस्यां स्पर्धायां सर्वेऽपि भागं ग्रहीतुमर्हन्ति ।

**(ई) रसप्रश्नः(प्रश्नमञ्चः)/ Quiz**

एकस्मात् अनुष्ठानात् कावपि द्वौ छात्रौ एव भागं ग्रहीतुं शक्नुतः।

(रसप्रश्नाः वेद-वेदाङ्ग-पुराण-इतिहास-दर्शन-काव्येषु सामान्यज्ञाने च भविष्यन्ति।)

प्रत्यनुष्ठानं निर्दिष्टसप्तस्पर्धालवोऽपि अत्र भागं ग्रहीतुमर्हन्ति।

**स्वीकृतिपत्रं तु 30 नवेम्बर् 2025 दिनाङ्कात् पूर्वम् ई-मेल्द्वारा प्रेषणीयम्।**
**अस्मदीयः ई-मेल्सङ्केतः vagvardhiniparishad@nsktu.org**

राष्ट्रियसंस्कृतविश्वविद्यालयस्य (nsktu.ac.in) जालपुटे अन्तर्जालमाध्यमेन पञ्जीकरणार्थं संपर्कसूत्रं प्रदत्तमस्ति। सर्वे कृपया संपर्कसूत्रद्वारा स्वकीयसंस्थागतछात्राणां पञ्जीकरणं कुर्वन्त्विति संसूच्यन्ते। अपि च नियमावल्या सह प्रदत्तपञ्जीकरणपत्रम् पृथक्-पूरयित्वा उपरि निर्दिष्टं E Mail द्वारा प्रेषयेयुः।

स्पर्धाविषये या काऽपि जिज्ञासा तथा वार्ताप्राप्तिसूचना च उपरिनिर्दिष्टसङ्केतमाध्यमेन विधातव्या।

*****

**डॉ. भारतभूषणरथः**
**संयोजकः**
वाग्वर्धिनीपरिषद्
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः, आं.प्र - 517507
चलद्वाणी – 88974 26243

**डॉ. प्रदीपकुमारबाग्**
**संयोजकः**
वाग्वर्धिनीपरिषद्
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः, आं.प्र – 517507
चलवाणी – **95332 05161**

**डॉ. उदयन हेगडे**
**सहसंयोजकः**
वाग्वर्धिनीपरिषद्
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः, आं.प्र – 517507
चलवाणी – **94810 26366**

**श्री क. वेङ्कटनारायण राव्**
**कुलसचिवः**
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः, आं.प्र - 517507
दूरभाषा- 0877-2286799
Website: http://www.nsktu.ac.in

धन्यवादपुरस्सरम्

**भवदीयः**

27/10/2025
**कुलसचिवः**